**२०२१-२२**
**शास्त्री-परीक्षा**
**खण्डः–प्रथमः, अधिसत्रं–द्वितीयम्**

**विषयः- अनिवार्यसंस्कृतम्, पत्रं- द्वितीयम्**

---

**समयः - ३½ होराः**
**सम्पूर्णाङ्काः – ७०**

**निर्देशः – एकस्यां पंक्तौ दश शब्दाः प्रतिपृष्ठं च अष्टौ पंक्तयो लेख्याः ।**

**१. अधोलिखितेषु त्रयः श्लोकाः सन्दर्भोल्लेखपुरस्सरं व्याख्येयाः - २१**

**क.** दिनकरकरामृष्टं बिभ्रद् द्युतिं परिपाटलां
दशनकिरणैरुपसर्पद्भिः स्फुटीकृतकेसरम्।
अयि मुखमिदं मुग्धे! सत्यं समं कमलेन ते
मधु मधुकरः किन्त्वेतस्मिन् पिबन्न विभाव्यते?

**ख.** स्वशरीरमपि परार्थे यः खलु दद्यादयाचितः कृपया।
राज्यस्य कृते स कथं प्राणवधक्रौर्यमनुमन्ये।।

**ग.** यैरत्यन्तदयापरैर्न विहिता वन्ध्यार्थिनां प्रार्थना

यैः कारुण्यपरिग्रहान्न गणितः स्वार्थः परार्थं प्रति।

ये नित्यं परदुःखदुःखितधियस्ते साधवोऽस्तं गता

मातः संहर वाष्पवेगमधुना कस्याग्रतो रुद्यते।।

**घ.** समुत्पत्स्यामहे मातर्यस्यां यस्यां गतौ वयम्।

तस्यां तस्यां प्रियसुते माता भूयास्त्वमेव नः।।

**२.मलयवत्याः चरित्रचित्रणं विधेयम् ।**

**०९**

**अथवा**

**नागानन्दचतुर्थाङ्कस्य कथासारं लिखत।**

**३.अधस्तनाः सर्वे प्रश्नाः समाधेयाः-**

**०५**

**क.** जीमूतवाहनस्य पितुः नाम किम्?

**ख.** नागानन्दनाटकस्य कथावस्तु केन जातकेन सम्बद्धम्?

**ग.** मित्रावसुः कस्याः भ्राता अस्ति?

**घ.** शंखचूडः कः?

ङ. मलयवती कस्याः पुत्री?

**४. अधोलिखितेषु केषाञ्चित् चतुर्णां सूत्राणां सोदाहरणं व्याख्या कार्या-**

**४x४=१६**

**क.** न विभक्तौ तुस्माः

**ख.** ह्रस्वस्य गुणः

**ग.** जशः शी

**घ.** अतो भिस ऐस्

**ङ.** ङसिङसोश्च

**च.** ङ्याप्प्रातिपदिकात्

**५.अधोलिखितेषु केषाञ्चित् त्रयाणां पदानां रूपसिद्धिः कार्या- ३x४=१२**

**क.** रामाणाम्

**ख.** हरये

**ग.** सर्वस्मात्

**घ.** रामम्

**ङ.** रमया

**६.  अधस्तनाः सर्वे प्रश्नाः समाधेयाः-**

**०७**

**क.**  अवसानसंज्ञाविधायकं सूत्रं किम्?

**ख**. प्रातिपदिकसंज्ञाविधायकं सूत्रं किम्

**ग.** सर्वनाम्नः ङे  इत्यस्य स्थाने किं भवति?

**घ.** केन सूत्रेण नस्य णो भवति?

**ङ.** विभक्तिसंज्ञाविधायकं सूत्रं किम्?

**च.** भसंज्ञाविधायकं सूत्रं किम्?

**छ.** बहुषु किं स्यात्?

*********************